# DeviStotra by Vishnu

# દેવીસ્તોત્રં વિષ્ણુનાકૃતમ્

## Document Information

Text title : devIstotra 3 by Vishnu

File name : devIstotramviShNu.itx

Category : devii, otherforms, devI

Location : doc_devii

Transliterated by : Vishwas Bhide

Proofread by : Vishwas Bhide, PSA Easwaran

Source : Devi Bhagavat Mahapurana 3.4

Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net

Latest update : June 14, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 31, 2020

*sanskritdocuments.org*

# દેવીસ્તોત્રં વિષ્ણુનાકૃતમ્

શ્રીભગવાનુવાચ -
નમો દેવ્યૈ પ્રકૃત્યૈ ચ વિધાત્ર્યૈ સતતં નમઃ ।
કલ્યાણ્યૈ કામદાયૈ ચ વૃદ્ધ્યૈ સિદ્ધ્યૈ નમો નમઃ ॥ ૧॥

સચ્ચિદાનન્દરૂપિણ્યૈ સંસારારણયે નમઃ ।
પઞ્ચકૃત્યવિધાત્ર્યૈ તે ભુવનેશ્યૈ નમો નમઃ ॥ ૨॥

સર્વાધિષ્ટાનરૂપાયૈ કૂટસ્થાયૈ નમો નમઃ ।
અર્ધમાત્રાર્થભૂતાયૈ હૃલ્લેખાયૈ નમો નમઃ ॥ ૩॥

જ્ઞાતં મયાઽખિલમિદં ત્વયિ સન્નિવિષ્ટં
    ત્વત્તોઽસ્ય સમ્ભવલયાવપિ માતરદ્ય ।
શક્તિશ્ચ તેઽસ્ય કરણે વિતતપ્રભાવા
    જ્ઞાતાઽધુના સકલલોકમયીતિ નૂનમ્ ॥ ૪॥

વિસ્તાર્ય સર્વમખિલં સદસદ્વિકારં
    સન્દર્શયસ્યવિકલં પુરુષાય કાલે ।
તત્ત્વૈશ્ચ ષોડશભિરેવ ચ સપ્તભિશ્ચ
    ભાસીન્દ્રજાલમિવ નઃ કિલ રઞ્જનાય ॥ ૫॥

ન ત્વામૃતે કિમપિ વસ્તુગતં વિભાતિ
    વ્યાપ્યૈવ સર્વમખિલં ત્વમવસ્થિતાઽસિ ।
શક્તિં વિના વ્યવહૃતો પુરુષોઽપ્યશક્તો
    વમ્ભણ્યતે જનનિ બુદ્ધિમતા જનેન ॥ ૬॥

પ્રીણાસિ વિશ્વમખિલં સતતં પ્રભાવૈઃ
    સ્વૈસ્તેજસા ચ સકલં પ્રકટીકરોષિ ।
અત્સ્યેવ દેવિ તરસા કિલ કલ્પકાલે
    કો વેદ દેવિ ચરિતં તવ વૈ ભવસ્ય ॥ ૭॥

ત્રાતા વયં જનનિ તે મધુકૈટભાભ્યાં
    લોકાશ્ચ તે સુવિતતાઃ ખલુ દર્શિતા વૈ ।
નીતાઃ સુખસ્ય ભવને પરમાં ચ કોટિં
    યદ્દર્શનં તવ ભવાનિ મહાપ્રભાવમ્ ॥ ૮॥

નાહં ભવો ન ચ વિરિઞ્ચિ વિવેદ માતઃ
    કોઽન્યો હિ વેત્તિ ચરિતં તવ દુર્વિભાવ્યમ્ ।
કાનીહ સન્તિ ભુવનાનિ મહાપ્રભાવે
    હ્યસ્મિન્ભવાનિ રચિતે રચનાકલાપે ॥ ૯॥

અસ્માભિરત્ર ભુવને હરિરન્ય એવ
    દૃષ્ટઃ શિવઃ કમલજઃ પ્રથિતપ્રભાવઃ ।
અન્યેષુ દેવિ ભુવનેપુ ન સન્તિ કિં તે
    કિં વિદ્મ દેવિ વિતતં તવ સુપ્રભાવમ્ ॥ ૧૦॥

યાચેઽમ્બ તેઽઙ્ઘ્રિકમલં પ્રણિપત્ય કામં
    ચિત્તે સદા વસતુ રૂપમિદં તવૈતત્ ।
નામાપિ વક્ત્રકુહરે સતતં તવૈવ
    સન્દર્શનં તવ પદામ્બુજયોઃ સદૈવ ॥ ૧૧॥

ભૃત્યોઽયમસ્તિ સતતં મયિ ભાવનીયં
    ત્વાં સ્વામિનીતિ મનસા નનુ ચિન્તયામિ ।
એષાઽઽવયોરવિરતા કિલ દેવિ ભૂયા-
    દ્વ્યાપ્તિઃ સદૈવ જનની સુતયોરિવાર્થે ॥ ૧૨॥

ત્વં વેત્સિ સર્વમખિલં ભુવનપ્રપઞ્ચં
    સર્વજ્ઞતા પરિસમાપ્તિનિતાન્તભૂમિઃ ।
કિં પામરેણ જગદમ્બ નિવેદનીયં
    યદ્યુક્તમાચર ભવાનિ તવેઙ્ગિતં સ્યાત્ ॥ ૧૩॥

બ્રહ્મા સૃજત્યવતિ વિષ્ણુરુમાપતિશ્ચ
    સંહારકારક ઇયં તુ જને પ્રસિદ્ધિઃ ।
કિં સત્યમેતદપિ દેવિ તવેચ્છયા વૈ
    કર્તું ક્ષમા વયમજે તવ શક્તિયુક્તાઃ ॥ ૧૪॥

ધાત્રી ધરાધરસુતે ન જગદ્બિભર્તિ
    આધારશક્તિરખિલં તવ વૈ બિભર્તિ ।

સૂર્યોઽપિ ભાતિ વરદે પ્રભયા યુતસ્તે
    ત્વં સર્વમેતદખિલં વિરજા વિભાસિ ॥ ૧૫॥

બ્રહ્માઽહમીશ્વરવરઃ કિલ તે પ્રભાવા-
    ત્સર્વે વયં જનિયુતા ન યદા તુ નિત્યાઃ ।
કેઽન્યે સુરાઃ શતમખપ્રમુખાશ્ચ નિત્યા
    નિત્યા ત્વમેવ જનની પ્રકૃતિઃ પુરાણા ॥ ૧૬॥

ત્વં ચેદ્ભવાનિ દયસે પુરુષં પુરાણં
    જાનેઽહમદ્ય તવ સંનિધિગઃ સદૈવ ।
નોચેદહં વિભુરનાદિરનીહ ઈશો
    વિશ્વાત્મધીરિતિ તમઃપ્રકૃતિઃ સદૈવ ॥ ૧૭॥

વિદ્યા ત્વમેવ નનુ બુદ્ધિમતાં નરાણાં
    શક્તિસ્ત્વમેવ કિલ શક્તિમતાં સદૈવ ।
ત્વં કીર્તિકાન્તિકમલામલતુષ્ટિરૂપા
    મુક્તિપ્રદા વિરતિરેવ મનુષ્યલોકે ॥ ૧૮॥

ગાયત્ર્યસિ પ્રથમવેદકલા ત્વમેવ
    સ્વાહા સ્વધા ભગવતી સગુણાર્ધમાત્રા ।
આમ્નાય એવ વિહિતો નિગમો ભવત્યૈ
    સઞ્જીવનાય સતતં સુરપૂર્વજાનામ્ ॥ ૧૯॥

મોક્ષાર્થમેવ રચયસ્યખિલં પ્રપઞ્ચં
    તેષાં ગતાઃ ખલુ યતો નનુ જીવભાવમ્ ।
અંશા અનાદિનિધનસ્ય કિલાનઘસ્ય
    પૂર્ણાર્ણવસ્ય વિતતા હિ યથા તરઙ્ગાઃ ॥ ૨૦॥

જીવો યદા તુ પરિવેત્તિ તવૈવ કૃત્યં
    ત્વં સંહરસ્યખિલમેતદિતિ પ્રસિદ્ધમ્ ।
નાટ્યં નટેન રચિતં વિતથેઽન્તરઙ્ગે
    કાર્યે કૃતે વિરમસે પ્રથિતપ્રભાવા ॥ ૨૧॥

ત્રાતા ત્વમેવ મમ મોહમયાદ્ભવાબ્ધે-
    સ્ત્વામમ્બિકે સતતમેમિ મહાર્તિદે ચ ।
રાગાદિભિર્વિરચિતે વિતથે કિલાન્તે
    મામેવ પાહિ બહુદુઃખકરે ચ કાલે ॥ ૨૨॥

નમો દેવિ મહાવિદ્યે નમામિ ચરણૌ તવ ।
સદા જ્ઞાનપ્રકાશં મે દેહિ સર્વાર્થદે શિવે ॥ ૨૩॥

ઇતિ શ્રીમદ્દેવીભાગવતમહાપુરાણે તૃતીયસ્કન્ધાન્તરગતમ્
ચતુર્થોऽધ્યાયે વિષ્ણુનાકૃતં દેવીસ્તોત્રં સમ્પૂર્ણમ્ ।

Verses 27 through 49

Encoded and proofread by Vishwas Bhide, PSA Easwaran

---

*DeviStotra by Vishnu*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*